अथ चरकसंहितायाः सूचीपत्रम् ।

(१) तत्र सूत्रस्थानं—


| | पत्रे | पंक्तौ |
|---|---|---|
| दीर्घंजीवितीयाध्यायः | १ | १ |
| अपामार्गतण्डुलीयाध्यायः | १२ | १ |
| आरग्वधीयाध्यायः | १६ | १० |
| षड्विरेचनशताश्रितीयाध्यायः | १८ | ६ |
| मात्राश्रितीयाध्यायः | २७ | ८ |
| तस्याश्रितीयाध्यायः | ३७ | १ |
| न वेगान् धारणीयाध्यायः | ४२ | १ |
| इन्द्रियोपक्रमणीयाध्यायः | ४८ | १ |
| खुड्डाकचतुष्पादाध्यायः | ५४ | १५ |
| महाचतुष्पादाध्यायः | ५७ | ४ |
| तिस्रैषणीयाध्यायः | ६० | १४ |
| वातकलाकलीयाध्यायः | ७० | १ |
| स्नेहाध्यायः | ७४ | ११ |
| स्वेदाध्यायः | ८३ | १ |
| उपकल्पनीयाध्यायः | ९० | १६ |
| चिकित्साप्राभृतीयाध्यायः | ९७ | ५ |
| कियन्तःशिरसीयाध्यायः | १०१ | १ |
| त्रिशोफीयाध्यायः | १११ | १० |
| अष्टोदरीयाध्यायः | ११७ | ६ |
| महारोगाध्यायः | १२१ | ५ |
| १ निर्मितीयाध्यायः | १२६ | १४ |

| | पत्रे | पंक्तौ |
|---|---|---|
| गोमयचूर्णीयं इन्द्रियं | ४२१ | ४ |


## (६) चिकित्सितस्थाने


| | | |
|---|---|---|
| अभयामलकीयं रसायनपादं | ४२६ | १ |
| प्राणकामीयं रसायनपादं | ४३७ | ४ |
| करप्रचितीयं रसायनपादं | ४४२ | ८ |
| आयुर्वेदसमुत्थानीयं रसायनपादं | ४४८ | १६ |
| संप्रयोगशरमूलीयं वाजीकरणपादम् | ४५५ | १४ |
| आसिक्तचीरीयं वाजीकरणपादं | ४६० | ४ |
| माषपर्णभृतीयं वाजीकरणपादं | ४६२ | १ |
| पुमान् जातबलादिकं वाजीकरणपादं | ४६५ | १४ |
| ज्वरचिकित्सितं | ४७० | १ |
| ज्वरनाशनाः कषाया | ४८५ | १६ |
| चन्दनाद्यं तैलम् | ४९० | ७ |
| उष्णाभिप्रायिणां ज्वरितानां अभ्यङ्गादयः | ४९१ | १९ |
| रक्तपित्त चिकित्सितम् | ४९९ | ८ |
| गुल्म चिकित्सितम् | ५०८ | ११ |
| प्रमेह चिकित्सितम् | ५२३ | २० |
| कुष्ठ चिकित्सितम् | ५२९ | १ |
| राजयक्ष्मचिकित्सितम् | ५४२ | १७ |
| अर्शसां चिकित्सितम् | ५५८ | ७ |
| अतीसार चिकित्सितम् | ५८१ | १३ |
| वीसर्प चिकित्सितम् | ५९४ | ७ |


Digitized by Google

| | पत्रे | पंक्तौ |
|---|---|---|
| कर्णरोग चिकित्सा | ७९४ | १२ |
| नेत्ररोग चिकित्सा | ७९५ | ८ |
| खालित्य चिकित्सा | ७९८ | १ |
| ऊरुस्तम्भ चिकित्सितम् | ८०० | ४ |
| वातव्याधि चिकित्सितम् | ८०५ | ५ |
| वातशोणित चिकित्सितम् | ८२५ | १ |
| योनिव्यापच्चिकित्सितम् | ८३७ | २१ |
| शुक्रदोष चिकित्सा | ८४८ | १ |
| क्लैब्यचिकित्सा | ८५० | ५ |
| प्रदरस्य लक्षणं चिकित्सा च | ८५४ | ५ |
| क्षीरदोष चिकित्सा | ८५६ | ११ |

(७) कल्पस्थाने

| | | |
|---|---|---|
| मदनकल्पम् | ८६४ | ६ |
| जीमूतकल्पम् | ८६९ | ८ |
| इक्ष्वाकुकल्पम् | ८७० | १६ |
| धामार्गवकल्पम् | ८७२ | १८ |
| वत्सककल्पम् | ८७४ | १२ |
| कृतवेधनकल्पम् | ८७५ | १५ |
| श्यामा त्रिवृत्कल्पम् | ८७६ | १८ |
| चतुरङ्गुलकल्पम् | ८८३ | ६ |
| तिल्वककल्पम् | ८८४ | १९ |
| महावृक्षकल्पम् | ८८६ | ४ |


Digitized by Google

तुलुङ्गलिकुचकरमर्द्दनीवदन्तशठवदरकोशाम्रभव्यजम्बुकपित्थतिन्तिलीकपालेवतानोटपनसनालिकेरदाडिमामलका-न्येवंप्रकाराणि चान्यानि सर्व्वं चाम्लं द्रवं अद्रवं च पयसा सह विरुद्धं कङ्गुवरकमकुष्ठककुलुथमाषनिष्पावाः पयसा सह विरुद्धाः पद्मोत्तरिकाशाकं शार्करो मैरेयो मधु च सहोपयुक्तं विरुद्धं वातञ्चातिकोपयति हारिद्रकः सर्षपतैलभृष्टो विरुद्धश्चातिकोपयति उपोदका तिलकल्कसिद्धा हेतुरतीसारस्य बलाका वारुण्याकुल्माषैरपि विरुद्धा सैव सूकरवसापरिभृष्टा सद्यो व्यापादयति मायूरमांसमेरण्डशीशका-सक्तमेरण्डाग्निप्लुष्टं सद्यो व्यापादयति तद्देव भस्मपांसुपरिध्वस्तं सचौद्रं मरणाय मत्स्यनैलनिस्ताडनमिश्राः पिप्पल्यस्तथा काकमाचो मधु च मरणाय मधु चोष्णमुष्णार्त्तस्य मधु मरणाय मधुमर्पिषी तुल्ये मत्र वारि चान्तरिक्षं समधृतं मधु पुष्करवीजं मधु पौलोशोदकं बल्लातकोशोदकं तक्रसिद्धः कम्पिल्लकः पर्युषिताकाचमाची अङ्गारशूल्यो भास इति विरुद्धानीत्येतद्यथा प्रश्नमभिनिर्दिष्टम् ।

भवन्ति चात्र श्लोकाः ।

यत्किञ्चिद्दोषमासाद्य न निर्हरति कायतः ।
आहारजातं तत् सर्वमहितायोपपद्यते ॥
यच्चापि देशकालाग्निमात्रासात्म्यानिलादिभिः ।
संस्कारतो वीर्यतश्च कोष्ठावस्थाक्रमैरपि ॥
परिहारोपचाराभ्यां पाकात् संयोगतोऽपि च ।
विरुद्धन्तच्च न हितं हृत्संपद्विधिभिश्च यत् ॥
विरुद्धं देशतस्तावद्रूक्षतीक्ष्णादिधन्वनि ।

वादिनं भगवन्तमात्रेयमग्निवेश उवाच कथमिह भगवन्! पञ्चानां गुल्मानां प्रति विशेषमभिजानीयाम। नह्यविशेषविद्रोगाणामौषधविदपि भिषक् प्रशमनसमर्थ इति तमुवाच भगवानात्रेयः। समुत्थानपूर्वं लिङ्गवेदनोपशयविशेषेभ्यो विशेषविज्ञानं गुल्मानां भवत्यन्येषां रोगाणाम्। अग्निवेश! तत्तु खलु गुल्मेषु मानं निबोध यत्र। पुरुषो वातलविशेषेण ज्वरवमनविरेचनातीसाराणामन्यतमेन कर्षणेन कर्शितो वातलमाहारमाहारमतिशीतं वा विशेषेणातिमात्रमस्नेहपूर्वं वा वमनविरेचने पिबत्यनुदीर्णां वा छर्दिमुदीरयत्युदीर्णान्वातमूत्रपुरीषवेगान्निरुणद्ध्यत्याशितो वा पिबति नवोदकमतिमात्रमभिमात्रसंक्षोभिना वा यानेन यात्यभिव्यवायव्यायाममद्यरुचिर्वाभिघातमिच्छति वा विषमासन शयनस्थानचङ्क्रमणसेवी वा भवत्यन्यद्वा किञ्चिदेवं विधं विषमतिमात्रं व्यायामजातमारभते। तस्यापचाराद्वातः प्रकोपमापद्यते। स प्रकुपितो महास्रोतोऽनुप्रविश्य रौक्ष्यात्काठिन्याच्चाप्रत्य पिण्डितोऽवस्थानङ्करोति। हृदि वस्तौ पार्श्वयोर्नाभ्यां वा स शूलमुपजनयति। ग्रन्थींश्चानेकविधान् पिण्डितश्चावतिष्ठते स पिण्डितत्वाद्गुल्म इत्युपचर्यते स मुहुराद्धमाति मुहुरल्पतामापद्यते अनियतवेदनाश्चलत्वाद्वायोः पिपीलिकासंप्रकीर्ण इव तोदस्फुरणायामसङ्कोचहर्षप्रलयोदयबहुलस्तदातुरः सूच्येव शङ्कुनेव चातिविद्धमात्मानं मन्यतेऽपि च दिवसान्ते ज्वर्यते शुष्यति चास्यास्यमुच्छ्वासश्चोपरुध्यते हृष्यन्ति रोमाणि वेदनायाः प्रादुर्भावे प्लीहाटोपान्त्रकूजाविपाकोदावर्ताङ्गमर्दमन्याशिरःशङ्ख-

Digitized by Google

शूलवृद्धिरोगाश्चैनमुपाद्रवन्ति कृष्णारुणपरुषत्वङ्नखनयनवदनमूत्रपुरीषश्च भवति निदानोक्तानि चास्य नोपशेरते विपरीतानि चोपशेरते इति वातगुल्मः तैरेव तु कर्शनैः कर्शितस्याम्ललवणकटुकक्षारोष्णतीक्ष्णशुष्कव्यापन्नमद्यहरितकफलाम्लानां विदाहिनाञ्च शाकमांसानां उपयोगादजीर्णाध्यशनाद्रौक्ष्यानुगते चामाशये वमनमतिवेलं सन्धारणं वातातपौ चातिसेवमानस्य पित्तं सह मारुतेन प्रकोपमापद्यते। तत् प्रकुपितम्मारुत आमाशयैकदेशे संवर्त्यभारेव वेदनाप्रकारानुपजनयति या उक्ता वातगुल्मे पित्तन्त्वेनं विदहति कुक्षौ हृद्युरसि कण्ठे वा स दह्यमानः धूममिवोद्गारमुद्गिरत्यम्लान्वितङ्गलावकाशश्चास्य दह्यते धूयते ऊषायते स्विद्यति क्लिद्यति शिथिल इव चास्य शरीरे सह्योऽल्परोमा च भवति ज्वरभ्रमदवथुपिपासागलवदनशोषप्रमोहविड्भेदश्च न प्रभवन्ति हरितहारिद्रत्वङ्नखनयनवदनमूत्रपुरीषश्च भवति निदानोक्तानि चास्य नोपशेरत इति पित्तगुल्मः तैरेव तु कर्शनैः कर्शितस्यात्यशनात् स्निग्धगुरुमधुरशीताशनात्पिष्टेक्षुक्षीरमाषविकृति सेवनान्मन्दक अतिक्रान्त मद्यपानाद्धरितकातिप्रणयादानूपौदकग्राममांसातिभक्षणात् सन्धारणादति सुभिक्षस्य चातिप्रगाढमुदकपानात् संक्षोभणाद्वा शरीरस्य श्लेष्मा सह मारुतेन प्रकोपमापद्यते। तं प्रकुपितं मारुत आमैकदेशे संवर्त्य तानेव वेदनाप्रकारानुपजनयति। अपिच गुल्मस्थैर्यगौरवकठिनावसुप्ततां तथा कासश्वासप्रतिश्यायान् राजयक्ष्माणाञ्चातिप्रहर्षः श्वैत्यं त्वङ्नखनयनवदनमूत्रपुरीषेषूपजनयति। निदानोक्तानि चास्य नोपशेरत इति

हीनवर्णबलाहारो यो नरो न स जीवति ॥
अहीने नयने यस्य मन्ये चानतकम्पने ।
बलहीनः पिपासार्त्तः शुष्कास्यो न स जीवति ॥
यस्य मस्तावपचितौ स्वरकासौ च दारुणौ ।
शूलौ मूढे ऽस्ति चाप्यन्नं तस्मिन् कर्म न सिध्यति ॥
व्यावृत्तमूर्द्धजिह्वाक्षो भ्रुवौ यस्य च विच्युते ।
कण्टकैश्चाचिता जिह्वा यथा प्रेतस्तथैव सः ॥
शेफश्चात्यर्थमुत्सिक्तं निःसृतौ वृषणौ भृशम् ।
अतश्चैव विपर्यासः प्रकृत्या प्रेतलक्षणम् ॥
निचितं यस्य मांसं स्यात्त्वगस्थन्येव दृश्यते ।
क्षीणश्चानश्नतस्तस्य मासमायुः परं भवेत् ॥

पूर्वरूपीयमिन्द्रियं समाप्तम् ।

---

अष्टमोऽध्यायः ।

अथातोऽवाक्शिरसीयमिन्द्रियं व्याख्यास्यामः ।

अवाक्शिरा वा जिह्मा वा यस्य वा शिशिरा भवेत् ॥
जन्तो रूपप्रतिच्छाया नैनमिच्छेच्चिकित्सितुम् ।
जटीभूतानि पक्ष्माणि दृष्टिश्चापि निरुद्ध्यते ॥
यस्य जन्तोर्न तं धीरो भेषजेनोपपादयेत् ।

Digitized by Google

संभ्रमोऽति प्रलापोऽति भेदोऽस्थ्नामति दारुणः ।
कालपाशपरीतस्य त्रयमेतत् प्रवर्त्तते ॥
प्रमुञ्चन् सञ्चयन् केशान् प्रतिगृह्णात्यतीव च ।
नरः स्वस्थवदाहारमबलः कालचोदितः ॥
समीपे चक्षुषोः कृत्वा मृगयेताङ्गुलीयकम् ।
आयतेऽपि च कालान्ध जर्ह्यांशानिमिषेक्षणः ॥
शयनादासनादङ्गात् काष्ठात् कुड्यादथापि वा ।
असन् मृगयते किञ्चित्प्रमुञ्चन् कालचोदितः ॥
यहासश्च हसनो मुञ्चन् प्रलेढि दशनच्छदौ ।
शीतपादकरोच्छ्वासो यो नरो न स जीवति ॥
आह्वयन्तं समीपस्थं स्वजनं जनमेव वा ।
महामोहावृतमनाः पश्यन्नपि न पश्यति ॥
अयोगमतियोगं वा शरीरे मतिमान् भिषक् ।
खादीनां युगपद्दृष्ट्वा भेषजं नावचारयेत् ॥
अतिप्रवृद्धा रोगाणां मनसश्च बलक्षयात् ।
वायुमुत्सृजति क्षिप्रं शरीरे देहसंश्रकम् ॥
वर्णस्वरावग्नि बलं वागिन्द्रियमनो बलम् ।
हीयते सुच्चये निद्रानित्या भवति वा नवा ॥
भिषग् भेषजपानान्नगुरुमित्रद्विषश्च ये ।
वशगाः सर्व एवैते बोद्धव्याः समवर्तिनः ॥
एतेषु रोगः क्रमते भेषजं प्रति हन्यते ।
नैषामन्नानि भुञ्जीत नचोदकमपि स्पृशेत् ॥
पादाः समेताश्चत्वारः सम्पन्नाः साधकैर्गुणैः ।
व्यर्था गतायुषो द्रव्याद्द विना नास्ति गुणोदय इति ॥

चन्दनाद्येन तैलेन तैलेन मधुकस्य वा ॥
ये च पित्तज्वरार्त्तानां सन्निक्ताः क्षीरवस्तयः।
हितास्ते पित्तगुल्मिभ्यो वत्त्यन्ते ये च सिद्धिषु ॥
शालयो जाङ्गलं मांसङ्गवाजी पयसी घृतम्।
खर्ज्जूरामलकं द्राचा दाड़िमं सपरूषकम् ॥
आहारार्थं प्रयोक्तव्यं पानार्थं सलिलं शृतम्।
बला विदारीगन्धाद्यैः पित्तगुल्मचिकित्सितम् ॥
आमान्वये पित्तगुल्मे सामेवा कफवातिके।
यवा गूभिः खलैर्यूषैःसन्धुक्ष्योऽग्निर्विलङ्घिते ॥
शम प्रकोपौ दोषाणां सर्वेषामग्निसंश्रितौ।
तस्मादग्निं सदा रक्षेन्निदानानि च वर्जयेत् ॥
वमनार्हाय वमनं प्रदद्यात्कफगुल्मिने।
स्निग्ध स्विन्नशरीराय गुल्मे शैथिल्यमागते ॥
परिवेष्ट्य प्रदीप्तांस्तु बल्वजानथवा कुशान्।
भिषक्कुम्भे समावाप्य गुल्मे घटमुपक्षिपेत् ॥
सङ्गृहीतो यदा गुल्मस्तदा घटमथोद्धरेत्।
वस्त्रान्तरं ततः कृत्वा भिन्द्यात्कुलम प्रमाणवित् ॥
विमार्गजं यदा दृष्ट्वैयथा लाभं प्रपीड़नैः।
मृद्नीयाद्गुल्ममेवैकं नचान्त्रहृदयं स्पृशेत् ॥
तिलैरण्डातसी बीजसर्षपैः परिलिप्य च।
श्लेष्मगुल्ममयःपात्रैः सुखोष्णैः स्वेदयेद्भिषक् ॥
सव्योषक्षार लवणं दशमूली शृतं घृतम्।
कफगुल्मञ्जयत्याशु स हिङ्गुविड़ दाड़िमम् ॥ दशमूलीघृतम्
भल्लातकानां द्विपलं पञ्चमूलं पलोन्मितम्।

यतस्त्वाभिनिवेशस्य माहुराप्ता महागदम्॥
स्नेहस्वेदोपपन्नन्तं संशोध्य वमनादिभिः।
कृतसंसर्जनं मेध्यैरन्नपानैरुपाचरेद्॥
ब्राह्मी स्वरससंयुक्तं पथ्यं गव्यमुदाहृतम्।
तत् सेव्यं शङ्खपुष्पी च यच्च सेव्यं रसायनम्॥
सुहृदश्चानुकूलास्तं स्वाप्तधर्म्मार्थवादिनः।
संयोजयेयुर्विज्ञानधैर्य्यस्मृतिसमाधिभिः॥
प्रयुञ्ज्यात्तैललशुनं पयसा वा शतावरीम्।
ब्राह्मीरसं कुष्ठरसं वचां वा मधुसंयुताम्॥
दुश्चिकित्स्योह्यपस्मारः चिरकारी कृतास्पदः।
तस्माद्रसायनैरेनं प्रायशः समुपाचरेत्॥
जलाग्निद्रुमशैलेभ्यो विषमेभ्यश्च तं सदा।
रक्षेदुन्मादिनं चैव सद्यः प्राणहरा हि ते॥

इति तत्र श्लोकौ।

हेतुं कुर्व्वन्त्यपस्मारं दोषाः प्रकुपिता यथा।
सामान्यतः पृथक् त्वाच्च लिङ्गं तेषां च भेषजम्।
महागद समुत्थानं लिङ्गं चोवाचसौषधम्॥
मुनिर्व्व्यासमासाभ्यामपस्मार चिकित्सिते।

इत्यपस्मार चिकित्सितम्।

दंष्ट्रा विषे मूलविषे सगरे कृत्रिमे विषे ।
यथार्हं स्निग्धकोष्ठेन पेयमेतद् विरेचनम् ।
हपुषा काञ्चना क्षीरी त्रिफला कटुरोहिणी ।
नीलिनी त्रायमाणा च सातला त्रिवृता वचा ॥
सैन्धवं काललवणं पिप्पली चेति चूर्णयेत् ।
दाड़िमत्रिफला मांसरसमूत्रसुखोदकैः ।
पेयोऽयं सर्वगुल्मेषु प्लीह्नि सर्वोदरेषु च
कुष्ठे श्वित्रे सरुजके सवाते विषमाग्निषु ॥
शोथार्शः पाण्डुरोगेषु कामलासु हलीमके ।
वातं पित्तं कफञ्चाशु विरेकात् संप्रसाधयेत् ॥
नीलिनीं निचुलं व्योषं द्वौ क्षारौ लवणानि च ।
चित्रकञ्च पिवेच्चूर्णं सर्पिषोदरगुल्मनुत् ॥
क्षीरद्रोणं सुधा क्षीर प्रस्थार्द्धं सहितं दधि ।
एतं विमथ्य तद्युक्तया त्रिवृत् सिद्धं पिवेद् घृतम् ॥
तथा सिद्धं घृतप्रस्थं पयस्यष्टगुणे पिवेत् ।
स्नुक् क्षीरपलकल्केन त्रिवृता षट् पलेन च ।
गुल्मानां गरदोषाणां उदराणाञ्च शान्तये ॥
दधिमण्डाढ़के सिद्धान् स्नुक् क्षीर पलकल्कितात् ।
घृतप्रस्थात् पिवेन् मात्रां तद्वज्जठरशान्तये ॥
तथाञ्चानुपिवेत् पेयां पयो वा स्वादु वा रसम् ।
घृते जीर्णे विरिक्तस्तु सुष्णमम्बु शृतं जलम् ॥
आगठ[illegible] तः पेयां यूषं कौलत्थकं ततः ।
पिवे[illegible] ल्वं भूयो वा प्रतियोजितः ॥
पुनः [illegible] सर्पिः स्नेहं वामिश्रकं पिवेत् ।

कोलास्थिमज्जाञ्जनमक्षिकाविड्लाजासितामागधिकं कणान्वा।

द्राक्षारसं वापि पिबेत्सुशीतं
मृद्लोष्टप्रभवं जलं वा।
जम्वाम्रयोः पल्लवजं कषायं
पिबेत्सुशीतं मधुसंयुतं वा॥
निर्गिरिस्थितं वारि समुद्गकृष्णं
सौवीरधान्याम्लपयोदकं वा।
गवेधुका मूलजलं गुडूच्या
जलं पिबेदिक्षुरसं पयो वा॥
सेव्यं पिबेत्काञ्चनगैरिकं वा
सवालकं तण्डुलधावनेन।
धात्रीरसेनोत्तमचन्दनं वा
तृष्णा वमिघ्नानि समाक्षिकाणि॥
कफान्विकायां वमनं प्रशस्तं
सपिप्पली सर्षपनिम्वतोयैः।
पिण्डीतकैः सैन्धवसम्प्रयुक्तै
र्वम्यां कफामाशय शोधनार्थम्॥
गोधूमशालीन् सयवान् पुराणान्
यूषैः पटोला मृतचित्रकाणाम्।
व्योषस्य निम्वस्य च तक्रसिद्धै-
र्योषैः फलाम्लैः कटुभिस्तु वाद्यात्॥
रसांश्च शुष्कानि च जाङ्गलानां
मांसानि जीर्णान्मधु शीध्वरिष्टान्।
रागांस्तथा खाडवपानकानि

तद्वर्षा स्वम्बुयोनित्वात् सङ्क्लेदं गुडवद्गतम् ॥
सर्पत्यम्बु घना पाये तद्गस्त्यो हिमस्ति च ।
प्रयाति मन्दवीर्यत्वं विषं तस्माद्घनात्यये ।
सर्पाः कीटोन्दुरा लूता वृश्चिका गलगोलिकाः ॥
जलौका मत्स्यमण्डूकाः कणभाः सकृकण्टकाः ।
श्वासिंहव्याघ्रगोमायुतरक्षु नकुलादयः ॥
दंष्ट्रिणोये विषं तेषां दंष्ट्रोत्थं जङ्गमं मतम् ।
मुस्तकं पौष्करं क्रौञ्चं वत्सनाभं बलाहकम् ॥
कर्कटं कालकूटञ्च करवीरकसंज्ञकम् ।
पालवेन्द्रायुधं तैलं मेढ्रकं कुशपुष्पकम् ॥
रोहिषं पुण्डरीकाख्यं लाङ्गलव्यञ्जनाभकम् ।
सङ्कोच मर्कटं शृङ्गि विषं हालाहलं तथा ॥
एवमादीनि चान्यानि मूलजानि स्थिराणि च ।
गरसंयोगजं चान्यद्गदत्तदुगरसंज्ञकम् ॥
कालान्तर विपाकित्वान्न तदाशु हरत्यसून् ।
निद्रां तन्द्रां क्लमं दाहं सपाकं लोमहर्षणम् ॥
शोफं चैवातिसारञ्च जनयेज्जङ्गमं विषम् ।
स्थावरं तु ज्वरं हिक्कां दन्तहर्षं गलग्रहम् ॥
फेनवम्यरुचि श्वासमूर्च्छाश्च जनयेद्विषम् ।
जङ्गमं स्यादधोभागमूर्द्धभागं तु मूलजम् ॥
तस्माद्दंष्ट्रि विषं मौलं हन्ति मौलं च दंष्ट्रिजम् ।
तृण्मोहदन्तहर्षप्रसेकवमथु क्लमा भवन्त्यादौ ।
वेगे रसप्रदोषादसृक्_प्रदोषात् द्वितीये च ॥



64

Digitized by Google

चत्वाग्धान्यारनालाम्लैः सह कुम्भ्यां विपाचयेत् ॥
नाड़ीस्वेदं प्रयुञ्जीत पिष्टैश्चैवोपनाहनम् ।
तैश्चसिद्धं घृतं तैलमभ्यङ्गः पानमेवच ॥
मुस्ताह्विकत्वलित्वचाः कुष्ठं सुराह्वंलवणं नतम् ।
दधिक्षीरचतुःस्नेहैः सिद्धं स्यादुपनाहनम् ॥
समिश्रबीजी गोधूम यवकोलस्थिरादिभिः ।
सस्नेहैः सकलं गात्रमालिप्य बहुलन्भिषक् ॥
एरण्डपत्रैः प्रच्छाद्य रात्रौ कल्यं विमोचयेत् ।
क्षीराम्बुना ततःसिक्तं पुनश्चैवोपनाहितम् ॥
मुञ्चेद्रात्रौ दिवाबद्ध चर्म्मभिश्च सुलोमभिः ।
फलानाम्लैलयोनीनामम्ल पिष्टानशीतलान् ॥
प्रदेहानुपनाहांश्च गन्धैर्वात हरैरपि ।
पायसैः कृशरैश्चैव कारयेत् स्नेहसंयुतैः ॥
ऊरुशुलानिलार्तानां मतः स्नेहात् प्रवच्यते ।
विविधान्विविधव्याधि प्रशमायामृतोपमान् ॥
द्रोणेऽम्भसः पचेद्भागान् दशमूलात् चतुष्पलान् ।
यवकोलकुलत्थानां भागैःप्रस्थोन्मितैः सह ॥
पादशेषे रसे पिष्टैर्जीवनीयैः सशर्करैः ।
तथा खर्जूरकाश्मर्यद्राक्षा बदरफल्गुभिः ॥
सक्षीरैःसर्पिषःप्रस्थः सिद्धःकेवलवातनुत् ।
निरत्ययः प्रयोक्तव्यः पानाभ्यञ्जनवस्तिषु ॥
चित्रकं नागरं रास्नां पौष्करं पिप्पलीं शटीम् ।
पिष्ट्वा विपाचयेत्सर्पि र्वातरोग हर परम् ॥
बलाबिल्वशृते क्षीरे घृतमण्डं विपाचयेत् ।

वमनैर्वा विरेकैर्वा वस्तिभिः शमनेन वा।
मारुतानां हि पञ्चानामन्योन्यावरणे नृप॥
लिङ्गं व्याससमासाभ्यामुच्यमानं मयाऽनघ।
प्राणो वृणोत्य पानादीन् प्राणं वृण्वन्त्यथापि च॥
उदानाद्यास्तथान्योऽन्यं सर्व एव यथाक्रमम्।
विंशति वरणान्येतान्युल्बणानां परस्परम्॥
मारुतानां हि पञ्चानां तानि सम्यक् प्रतर्कयेत्।
शिरोग्रहः प्रतिश्यायो निःश्वासोच्छ्वाससंग्रहः॥
हृद्रोगो मुखशोषश्चाप्युदाने प्राणसंवृते।
तत्रोर्द्धभागिकं कर्म कार्यमाश्वासनं तथा॥
कर्मौजो बलवर्णानां नाशो मृत्युरथापि वा।
उदानेनावृते प्राणे तं शनैः शीतवारिणा॥
सिञ्चेदाश्वासयेच्चैव सुखं चैवोपपादयेत्।
ऊर्द्धगेनावृते प्राणे छर्दि श्वासादयो गदाः॥
स्युर्वाते तत्र वस्त्यादि भोज्यं चैवानुलोमनम्।
मेहाश्मोग्निरतीसार ऊर्द्धगेऽपानसंवृते॥
वाते स्युर्वमनं तत्र दीपनं ग्राहि चाशनम्।
वम्याध्मानमुदावर्त्तं गुल्मार्त्तिपरिकर्त्तिकाः॥
लिङ्गं व्यानावृते पाने तं स्निग्धैरनुलोमयेत्।
अपानेनावृते व्याने भवेद्विण्मूत्र रेतसाम्॥
अतिप्रवृत्तिस्तत्रापि सर्वं संग्रहणं मतम्।
मूर्च्छा तन्द्रा प्रलापोऽङ्गसादोऽग्न्योजो बलक्षयः॥
समानेनावृते व्याने व्यायामो लघु दीपनम्।
स्तब्धताल्पाग्निता स्वेदस्य चेष्टा हानिर्निमीलनम्॥

इन्द्रगोपकसङ्काशमार्तवं यदमिव तत् ।
योनीनां वातलाद्यानां यदुक्तं इह भेषजम् ॥
चतुर्णां प्रदराणाञ्च तत्सर्वं कारयेद्भिषक् ।
रक्तातिसारिणाञ्चैव तथा लोहितपित्तिनाम् ॥
रक्तार्शसाञ्च यत्प्रोक्तं भेषजं तच्च कारयेत् ।
धात्री स्तनस्तन्य सम्पदुक्ता विस्तरशः पुरा ॥
स्तन्य सञ्जननञ्चैव स्तन्यस्य च विशोधनम् ।
वातादि दुष्टे लिङ्गञ्च चीणस्य च चिकित्सितम् ॥
तत्सर्वमुक्तं ये त्वष्टौ चीरदोषाः प्रकीर्तिताः ।
वातादिष्वेव तान् विद्यात् शास्त्रे चक्षुर्भिषक्तमः ॥
त्रिविधास्तु यतः शिष्यास्ततो वक्ष्यामि विस्तरम् ।
अजीर्णा सात्म्यविषमविरुद्धात्यर्थ भोजनात् ॥
लवणाम्लकटुक्षारप्रक्लिन्नानाञ्च सेवनात् ।
मनः शरीरसन्तापादस्वप्नान्निशि चिन्तनात् ॥
प्राप्तवेगप्रतीघातादप्राप्तोदीरणेन च ।
परमान्नं गुडकृतं कृसरं दधि मर्दकम् ॥
अभिष्यन्दीनि मांसानि ग्राम्यानूपौदकानि च ।
भुक्ता भुक्ता दिवा स्वप्नाम्मद्यस्याति निषेवणात् ॥
अनायासादभीघातात् क्रोधाच्चातङ्ककर्शनैः ।
दोषाः चीराशयाः प्राप्य शिराः स्तन्यं प्रदूष्य तत् ॥
कुर्युरष्टविधं भूयो दोषास्तत्तन्निबोधत ।
वैरस्यं फेनसङ्घाति रौक्ष्यं चेत्यनिलात्मकम् ॥
पित्ताद्वैवर्ण्यं दौर्गन्ध्ये स्नेहपैच्छिल्य गौरवम् ।
कफाद्भवति रूक्षाद्यैरनिलः स्वैः प्रकोपणैः ॥

Digitized by Google

द्रातप शुष्कं वा चूर्णीकृतं जीमूतादिकषायेण पित्त कफ-स्थानगते पाययेदिति समानं पूर्वेण। फलपिप्पलीचूर्णानि पूर्ववत् फलादीनां षण्णामन्यतमकषायस्त्रुतानिवर्ति क्रियाः फलकषायोपसर्जनाः पेया इति समानं पूर्वेण। फलपिप्पलीष्वा-रग्वध वृषक स्वादुकण्टकपाठा पाटली शार्ङ्गेष्टामर्वा सप्त-पर्णनक्तमालपिचुमन्दपटोल सुषवी गुडूची सोमवल्कद्वीपि-कानां पिप्पली पिप्पलीमलद्दस्ति पिप्पलीचित्रक शृङ्गवेराणां चान्यतमकषायेण सिद्धो लेह इति समानं पूर्वेण फलपिप्प-लीष्वेलाहरेणुका शतपुष्पा कुस्तुम्बुरुतगरकुष्ठत्वक् चोरकम-रुवका गुग्गुलुवालक श्रीवेष्टक परिपेलव मांसी शैलेय-कथौणेयक सरलपारावत पद्मशोकरोहिणीनां विंशतेरन्य-तमस्य कषायेण साधितोत्कारिका कल्केन यथा मोदको वा मोदककल्केन यथादोष रोगभक्ति प्रयोजत इति समानं पूर्वेण। फलपिप्पली स्वरसकषाय परिभावितानि तिलशा-लितण्डुलपिष्टानि तत्कषायोपसर्जनानि षष्कुलीकल्पेन वा नूपा इति समानं पूर्वेण। एतेनैव च कल्पेन सुमुखसुरस-कुठेरककण्ठोरकाल पालककर्पास कद्दवकफणिज्जकशृङ्गवेणु-गृञ्जनभूस्तृणककासमर्दभृङ्गराजानामिक्षुवालिका कालं कतकेक्षु काण्डेक्षु दण्डेरकानां चान्यतमस्य कषायेण कार-येत्। तथा वदरषाडवरागलेह मोदकोत्कारिका तर्पणपा-नकमांसरसयूषमद्यानां मदनफलान्यन्यतमेनोपसृजत यथा-दोष रोगदोष भक्तिद्व्यार्त्तः साधु वमतीति।

तत्र श्लोकाः। मदनः करघाटश्च राठः पिण्डीतकः फलम्।
श्वसनश्चेति पर्यायैरुच्यते तस्य कल्पनाः॥

धान्यतुम्बुरुयूषेण कल्कः सर्व्व वषापह्नः ।
जात्या सौमनसायिन्या रजन्याश्चौरकस्य वा ॥
पुनर्नवाकासमन्द विम्बोह्नैमवतस्यच ।
महा मद्दा चुद्रमद्दा ह्रस्वीवानां पृथक्पृथक् ॥
एवं धामार्गवं हेवा कषाये परिमृद्यतु ॥
पूतंमनो विकारेषु पिवेद्दमन मुत्तमम् ।
तत् श्त चीरजं सर्पिः साधितं वा फलादिभिः ॥
तत्र श्लोकौ। पल्लवेन च चत्वारः चीरएकः सुरासवे ।
कषायाः विंशतिः कल्कौ दश द्वौ च शक्तद्रसे ॥
चत्र एक स्तथाग्नेये दशलेह्यास्तथाघृतम् ।
कल्पे धामार्गवस्योक्ताः षष्टिर्योगा महर्षिणा ॥

---

## अथ पञ्चमोऽध्यायः ।

अथातो वत्सककल्पं व्याख्यास्यामः ।

अथ वत्सकनामानि भेदं स्त्रीपुंसयोस्तथा ।
कल्पञ्चास्य निवोधेमं विस्तरेण यथातथम् ॥
वत्सकः कुटजश्चैव ह्वचको गिरिमल्लिका ।
बीजानीन्द्रयवास्तस्य तथोच्यन्ते कलिङ्गकाः ॥
वृहत् पलच्छितैः पुष्पैः स्निग्धपत्रः पुमान् भवेत् ।
श्यावारुणानु पुष्पौ स्त्रीफलवृन्तैस्तथाणुभिः ॥
रक्त पित्त कफघ्नस्तु सुकुमारे घनत्ययः ।

तत्र श्लोकाः ।

दन्ती द्रवन्ती कल्पेऽस्मिन् प्रोक्ताः षोडशकाश्रयः ॥
नानाविधानां योगानां भक्ति दोषामयान् प्रति ।
त्रिंशत् पञ्चपञ्चाशं योगानां वमने स्मृतम् ॥
द्वे शते नवकाः पञ्च योगानान्तु विरेचने ।
ऊर्द्धानुलोमे भागानामित्युक्तानि शतानि षट् ॥
प्राधान्यतः समाश्रित्य द्रव्याणि दशपञ्च च ।
यद्धि येन प्रधानेन द्रव्यं समुपकल्प्यते ॥
तत्संज्ञकः ससंयोगो भवतीति विनिश्चितम् ।
फलादीनां प्रधानानां गुणभूताः सुरादयः ॥
ते हितान्यनुवर्त्तन्ते मनुजेन्द्रमिवेतरे ।
विरुद्धवीर्य्यमप्येषां प्रधानानामबाधकम् ॥
अधिके तुल्यवीर्य्येऽपि क्रिया सामर्थ्यमिष्यते ।
दृष्टवर्णरसस्पर्शगन्धार्थं प्रति चामयम् ॥
अतो विरुद्धवीर्य्याणां प्रयोग इति निश्चितम् ।
भूयश्चैषां बलाधानं कार्य्यं स्वरसभावनात् ॥
सुभावितं ह्यल्पमपि द्रव्यं स्याद्बहु कर्म्मकृत् ।
स्वरसैस्तुल्यवीर्य्यैर्वा तस्माद्द्रव्याणि भावयेत् ॥
अल्पस्यापि महार्थत्वं प्रभूतस्यापि कर्म्मताम् ।
कुर्य्यात् संयोगविश्लेषकालसंस्कारयुक्तिभिः ॥
प्रदेशमात्रमेतावद्दृष्टव्यमिह षट्शतम् ।
सुबुद्धिरेवं सहस्राणि कोटीर्वापि प्रकल्पयेत् ॥
बहुद्रव्यविकल्पत्वाद्योगसंख्या न विद्यते ।
तीक्ष्णमध्यमृदूनान्तु तेषां शृणुत लक्षणम् ॥

Digitized by Google

येभ्यो यच्च हितं यस्मात् क्रमयेभ्यश्च यद्धितम्।
सर्वेकान्तेन निर्द्दिष्टं तत्राभिनिवेशेतश्चित्॥
स्वार्थमपत्र वैद्येन तर्क्यं बुद्धिमता भवेत्।
उत्पद्येत हि सावस्था देशकालबलम्प्रति॥
यस्यां कार्य्यमकार्य्यं स्यात् कर्मकार्य्यञ्च वर्ज्जयेत्।
छर्द्दिहृद्रोग गुल्मार्त्तौ वमनं स्वे चिकित्सिते॥
अवस्थां प्राप्य निर्द्दिष्टं कुष्ठिनाम्वस्ति कर्म्म च।
तस्मात्सत्यपि निर्द्दिष्टे कुर्य्यादूह्य स्वयन्धिया॥
विना वितर्काद्या सिद्धिर्यदृच्छा सिद्धिरेव॥ इति।

---

## अथ तृतीयोऽध्यायः।

अथातो वस्ति सूत्रीयां सिद्धिं व्याख्यास्यामः।

कृतक्षणं शैलवरस्य रम्ये स्थितं धनेशायमकस्य पार्श्वे।
महर्षि संघैर्वृतमग्निवेशः पुनर्वसुम्प्राञ्जलिरन्वपृच्छत्॥
वस्तिर्नरेभ्यः किमपेक्ष्य दत्तःस्यात्सिद्धि मर्क्कसयमस्य नेत्रम्।
कीदृक् प्रमाणाकृति किङ्गुणञ्च केषाञ्च किं योनि गुणाश्च वस्तिः॥
निरूहकर्म्म प्रणिधानमात्राः स्नेहस्य वा काः शयनेविधिः कः।
के वस्तयः केषु मता इतीदं श्रुत्वोत्तरं प्राह वचो महर्षिः॥
अपेक्ष्य दोषौषध देशकालसात्म्याग्नि सत्त्वौ कवयो बलानि।
वस्तिः प्रयुक्तो नियतं गुणाय स्यात् सर्वकर्माणि च सिद्धिमन्ति
सुवर्णरूप्यत्रप्र पुताम्यरीति कांस्यास्थि शस्त्रद्रुमवेणुदन्तैः।
नेत्राणि शृङ्गैर्मणिभिर्न्नलैश्च विकर्णिकानि प्रवदन्ति तज्ज्ञाः॥
षड् द्वादशाष्टाङ्गलसम्मितानि षड्विंशति द्वादशवर्षजानाम्।

सदातुरा: श्रोत्रिय राजसेवकास्तथैव वेश्या: सह पण्यजीविभि:
द्विजो हि शिष्याध्ययन व्रताह्निकक्रियादिभिर्देह हितं न चेष्टते
नृपोपसेवी नृपचित्तरक्षणात्परानुरोधाद्बहुचिन्तनाद्भयात्
नृचित्तवर्त्ति न्युपचित्ततत्परा मृजाविभूषा निरता पराङ्गना
सदासनादर्थ्यगुवर्ण विक्रयक्रयादिलोभादपि पण्यजीविन:
सदैव ते ह्यागतवेगनिग्रहं समादिकाले च न कालभोजन:
अकालनिर्हारविहारसेविनो भवन्ति येन्येऽपि सदातुराश्च ते
समीरणं वेगविधारणोद्धतं विबद्धसर्वाङ्गरुजाकरं भिषक्
समीक्ष्य तेषां फलवर्तिमादित:प्रयोजयेत् तत्र च साधु बुद्धिमान्
तथा चभल्लातकबिल्वचित्रकान्द्विपञ्चमूलक्कृत चालकान्फलम्
सतैलसर्पिर्गुडसैन्धवाहित: सदा नराणां बलवर्णवर्द्धन: पर:
तथैव शस्तं मधुकेन साधितं फलेन बिल्वेन शताह्वयाथवा
सजीवनी यस्तु रसोनुवासने निरूहणे चात्लवणो शिशोर्हित:
नचान्यदाय्वङ्गबलाभिवर्द्धनं निरूहवस्ते: शिशु वृद्धयो: परम्

तत्र श्लोक: ।

फलकर्म्मवस्तिरवरतत्त्वानिश्चयो वाजादीनाम् ।
सततातुराश्च दृष्टा: फलमात्रायां हितं चैषाम् ॥

इति फलमात्रा सिद्धिरेकादशी ।

---

अथ द्वादशोऽध्याय: ।

अथात उत्तरसिद्धिं व्याख्यास्याम: ।

अथ खल्वातुरं वैद्य: संशुद्धं वमनादिभि: ॥
दुर्बलं कृशमल्पाग्निमुक्तसन्धानबन्धनम् ।
निर्हृतानिलविण्मूत्रकफपित्तं कफामयम् ॥

Digitized by Google

यन्त्रपीडितानां रसप्रस्थमेकैकं तद्वद्घृततैलयोगो हंसाण्ड-रस वसामज्जादिश्च साधयेद्ब्रह्मघोषशङ्खपटहभेरी निनादैः सिद्धं सितच्छत्रकृतच्छायं गजस्कन्धमारोपयेद्गजवन्तं वृष-ध्वजं अभिपूज्य तं स्नेहः त्रिभागमाक्षिक मङ्गलाशीः स्तुति देवतार्चनैर्वस्तिं शमयेत्। एष बल्यो बृंहण आयुष्योवली-पलितनुत् क्षीणक्षतनष्टशुक्र विषमज्वरार्तानां व्यापन्नया-नीनां च पथ्यतमः सहचरपलशतं प्रोदकद्रोण चतुष्टये पक्वा द्रोणशेषे रसे सुपूते द्विगुणविदारीक्षु रसप्रस्थाभ्यामष्ट-गुणक्षीरं घृततैलप्रस्थं फला मधुके मधूकचन्दनमधूलिका-शारिवामेदा महामेदा काकोलीक्षीरकाकोली पयस्या गुडशार्ङ्गेष्टाव्याघ्र नखशटी सहस्रवीर्यावराङ्गलोध्राणामक्ष-समैर्द्विगुणशर्करैः कल्कैः साधयित्वा ब्रह्मघोषादिर्विधिना तत्सिद्धं वस्तिं दद्यादेष सर्वरोगहरो रसायनो ललि-तानां श्रेष्ठोऽन्तः पुरचारिणां क्षतक्षयवातपित्तवेदना श्वा-सकासहरस्त्रिभागमाक्षिको वली पलितमुद्धर्णरूपबलमांस शुक्रवर्द्धना इत्येते रसायनाः। स्नेहवस्तय इति विभवे शतपाका वा सहस्रपाका वा कार्या वीर्यबलाधानार्थमिति

तत्र श्लोकः।

नमद्यमध्याशिशिरमम्बु च सभोजनं रथक्षोभे वस्ति-ष्वेतेषु गर्हितम्।

शिखि गोनण्डहंसाण्डैर्दशवहस्तयस्त्रयः।
विंशतिर्विष्किरैस्त्रिंशत्प्रतुदैः प्रसहैस्तथा॥
त्रिंशदेकास्तथा तस्मा विंशतिश्चाम्बुचारिभिः।
नवमत्स्यादिभिश्चैव शिखि कल्पेन वस्तयः॥

| | | | |
|---|---|---|---|
| ाध्यसंग्रह (८ मूर्ख) | ५ | (कृत भाष्य सहितम्) | २ |
| नङ्गानुशासन सटीक | ।० | ६९ चन्द्रशेखरचम्पूकाव्य | |
| ऋतुसंहार सटीक | ।= | सम्पूर्ण | २ |
| विक्रमोर्वशी सटीक | १॥० | ७० सामवेदस्य मन्त्र ब्राह्मणम् | |
| ामलतिलकभाण | ।= | भाष्य सहितम् | २ |
| ायत्री व्याख्या | ॥० | ७१ आरण्यसंहिता भाष्यसहिता | १ |
| सांख्यदर्शन (भाष्य सहित) | | ७२ विद्धशालभञ्जिका नाटिका सटीक | १ |
| सांख्य प्रवचन भाष्य | २ | ७३ कारण्डव्यूह (बौद्धशास्त्रम्) | २ |
| भोज प्रबन्ध | ।॥० | ७४ कुवलयानन्द सटीक अलङ्कार | १ |
| नलोदय सटीक | ॥= | ७५ प्रियदर्शिका नाटिका सटीक | |
| ईश केन कठ प्रश्न मुण्ड | | (श्रीहर्षविरचित) | ॥० |
| ण्डूक्य (सटीक सभाष्य) | ५ | ७६ सारस्वत व्याकरण सटीक पूर्वार्द्ध | १।० |
| छान्दोग्य (उपनिषद्) | | ७७ वासवदत्ता सटीक | २ |
| सभाष्य सटीक | ५ | ७८ (कालिदास कृत) | |
| तैत्तिरीय ऐतरेय श्वेताश्वतर | | पुष्पबाण विलास काव्य सटीक | ॥० |
| निषद्) सभाष्य सटीक | २ | ७९ महिम्न शतकम्, पदारविन्द | |
| बृहदारण्यक (उपनिषद्) | | शतकम्, स्तुति शतकम् मन्दस्मित- | |
| क भाष्य | १० | शतकम् कटाक्षशतकम् | १ |
| सुश्रुत वैद्यक | ४ | ८० मनुसंहिता कुल्लूकभट्ट कृत | |
| शार्ङ्गधर (वैद्यक) | १ | टीका सहित | ५ |
| वेतालपञ्चविंशति | ।॥० | ८१ नैषधचरितम् (मल्लिनाथ कृत | |
| पातञ्जलदर्शन (सभाष्यसटीक) | ४ | टीका सहित) | १० |
| आत्मतत्त्वविवेक (बौद्धाधिकार) | २ | ८२ चन्द्रालोक प्राचीन अलङ्कार | ॥० |
| मुक्तिकोपनिषत् | = | ८३ वीरमित्रोदय(स्मृतिशास्त्र | १० |
| उपमान चिन्तामणि | ।० | ८४ भावप्रकाश (वैद्यक) | १० |
| मानानन्द नाटक | १ | ८५ प्रबोधचन्द्रोदय | |
| पूर्णप्रज्ञ दर्शनम् मध्वस्वामि | | नाटक सटीक | २ |

6689-19

Digitized by Google

८६ अनर्घराघव नाटक (मुरारि कृत) २ | १०४ वेदा शारीरः
८७ दैवतब्राह्मण सभाष्य १ | नन्द
८८ षड्विंशब्राह्मण १ | १०५
८९ मीमांसा परिभाषा ॥० | १०६
९० अर्थसंग्रह (लौगाक्षी कृत) | १०७
मीमांसा ॥० | १०८ ।
९१ रघुवंश सटीक १॥० | १०९ मणिक
९२ मेघदूत सटीक ।॥० | ११० अवि
९३ ईश्वरनिरूपणम् (तर्कवाचस्पति कृतम्) १ | याज्ञवल्क्य आपस्तम्ब, व
९४ ईश्वरानुमानचिन्तामणि (गङ्गेशोपाध्याय कृत) १ | स्मृति पराश दक्ष गौतम
९५ न्यायदर्शन सभाष्य सवृत्ति २॥० | शौत, संहित
९६ सटीक वाल्मीकिरामायण (बालकाण्डस्य प्रथमावधि त्रयोदश सर्गपर्य्यन्तम् १॥० | १११ मनु ११२ चरकसंहि ११३ रसेन्द्रचि
९७ सटीक वाल्मीकि रामायण बालकाण्डस्य चतुर्द्दश सर्गावधि पञ्चविंशति सर्गपर्य्यन्तम् १॥० | ११४ अ आनन्द सु
९८ मदनपालनिघण्टु (वैद्यक) १ | ११५ शब
९९ संस्कृतशिक्षामञ्जरी प्रथमभाग— | ११६ माला
१०० संस्कृतशिक्षामञ्जरी द्वितीय भागः ।० | ११७ सटीः ११८ सटीव
१०१ साहित्यदर्पणम् १॥० | ११९ सटी
१०२ श्रीहर्षचरित वाणभट्टकृत २ | बालकाण्डस्य
१०३ अमरकोष ॥० | चत्वारिंशत् सर्ग
१२० सभाष्यशाण्डि
१२१ लघुकौमुदी


कलिकाता संस्कृत विद्यामन्दिरे—बि, ए, उप
श्रीजीवानन्द-विद्यासागर-भट्टाचार्य्यस्य सकाश

Digitized by Google

